Assd. Professor - 2017

पेपर सील खोले बगैर इस तरफ से उत्तर शीट को बाहर निकालें ।
**Without opening the Paper seal take out Answer Sheet from this side.**

207455
Serial No.

परीक्षा का वर्ष : 2017
प्रश्न-पुस्तिका

# SPU-03

अपना अनुक्रमांक सामने अंकों में बॉक्स के अन्दर लिखें

शब्दों में

प्रश्न-पुस्तिका शृंखला

**C**

## संस्कृत

## SANSKRIT

समय : 2.00 घंटे
पूर्णांक : 200

**Time : 2.00 Hours**
**Maximum Marks : 200**

**प्रश्नों के उत्तर देने से पहले नीचे लिखे अनुदेशों को ध्यान से पढ़ लें ।**

### महत्त्वपूर्ण निर्देश

1. प्रश्न-पुस्तिका के कवर पेज पर अथवा अन्दर कहीं भी कुछ न लिखें ।
2. **सभी** प्रश्नों के अंक समान हैं ।
3. **अभ्यर्थी अपने अनुक्रमांक, विषय एवं प्रश्न-पुस्तिका की सीरीज की कोडिंग सही-सही करें, अन्यथा उत्तर-पत्रक का मूल्यांकन नहीं किया जायेगा और उसकी जिम्मेदारी स्वयं अभ्यर्थियों की होगी ।**
4. **अभ्यर्थी रफ कार्य हेतु प्रश्न-पुस्तिका (बुकलेट) के अन्त में दिये गये पृष्ठों का उपयोग करें । अलग से वर्किंग शीट उपलब्ध नहीं करायी जायेगी ।**
5. **इस प्रश्न-पुस्तिका में 100 आइटम्स (प्रश्न) हैं ।** प्रत्येक आइटम के चार वैकल्पिक उत्तर आइटम के नीचे दिए गए हैं । इन चारों में से केवल एक ही सही उत्तर है । जिस उत्तर को आप सही या सबसे उचित समझते हैं, उत्तर-पत्रक (आन्सर शीट) में उसके अक्षर वाले वृत्त को **काले अथवा नीले बॉल प्वाइंट पेन से पूरा काला/नीला कर दें ।**
6. सभी प्रश्नों (आइटमों) का उत्तर दिया जाना है और प्रत्येक प्रश्न (आइटम) के समान अंक हैं । आपके जितने उत्तर सही होंगे उन्हीं के अनुसार अंक दिये जायेंगे ।
7. आयोग द्वारा आयोजित की जाने वाली वस्तुनिष्ठ प्रकृति की परीक्षाओं में ऋणात्मक मूल्यांकन (Negative Marking) पद्धति अपनायी जायेगी । उम्मीदवार द्वारा प्रत्येक प्रश्न के लिए दिए गए गलत उत्तर के लिए या उम्मीदवार द्वारा एक प्रश्न के एक से अधिक उत्तर देने के लिए (चाहे दिए गए उत्तर में से एक सही ही क्यों न हो), उस प्रश्न के लिए दिए जाने वाले अंकों का **एक-चौथाई** दण्ड के रूप में काटा जाएगा । दण्ड स्वरूप प्राप्त अंकों के योग को कुल प्राप्तांक में से घटाया जाएगा ।
8. अपने उत्तर आपको अलग से दिये गये उत्तर-पत्रक में अंकित करने हैं । **आपको अपने सभी उत्तर केवल उत्तर-पत्रक पर ही देने हैं ।** उत्तर-पत्रक के अतिरिक्त अन्य कहीं पर दिया गया उत्तर मान्य न होगा ।
9. उत्तर-पत्रक पर कुछ लिखने के पूर्व उसमें दिये गये सभी अनुदेशों को सावधानीपूर्वक पढ़ लें । जो सूचनाएँ उसमें वांछित हों उन्हें अभी भर लें ।
10. परीक्षा समाप्ति के उपरान्त अन्तरीक्षक को उत्तर-पत्रक वापस लौटा दें ।
11. यदि आपने इन अनुदेशों को पढ़ लिया है, इस पृष्ठ पर अपना अनुक्रमांक अंकित कर दिया है और उत्तर-पत्रक पर वांछित सूचनाएँ भर दी हैं, तो तब तक इन्तजार करें जब तक आपको प्रश्न-पुस्तिका खोलने को नहीं कहा जाता ।
12. उत्तर-पत्रक (O.M.R. Answer Sheet) का मूल्यांकन ओ.एम.आर. आंसर शीट पर अंकित सीरीज कोड के आधार पर ही किया जायेगा ।
13. प्रश्न-पुस्तिका (Question Booklet) में से उत्तर-पत्रक (O.M.R. Answer Sheet) निकालने के पश्चात् उत्तर-पत्रक एवं प्रश्न-पुस्तिका के सीरीज कोड (A, B, C & D) का मिलान अवश्य कर लें । यदि उत्तर-पत्रक एवं प्रश्न-पुस्तिका के सीरीज कोड भिन्न-भिन्न हों, तो उसे तुरन्त अन्तरीक्षक (Invigilator) से परिवर्तित कराकर समान सीरीज कोड का उत्तर-पत्रक एवं प्रश्न-पुस्तिका प्राप्त कर लें । यदि उक्तानुसार कार्यवाही नहीं की जाती है, तो उसके लिए अभ्यर्थी स्वयं जिम्मेदार होगा ।

**जब तक न कहा जाय इस प्रश्न-पुस्तिका को न खोलें ।**

**महत्त्वपूर्ण : प्रश्न-पुस्तिका खोलने पर तुरन्त जांच कर देख लें कि प्रश्न-पुस्तिका के सभी पेज भली-भाँति छपे हुए हैं । यदि प्रश्न-पुस्तिका में कोई कमी हो, तो अन्तरीक्षक को दिखाकर उसी सीरीज की दूसरी प्रश्न-पुस्तिका प्राप्त कर लें ।**

## संस्कृत

1. 'उपजरसम्' इत्यत्र 'टच्' प्रत्ययः केन सूत्रेण विधीयते ?

(a) अनश्च
(b) नपुंसकादन्यतरस्याम्
(c) अव्ययीभावे शरत्प्रभृतिभ्यः
(d) झयः

2. शब्दकौस्तुभस्य व्याकरणग्रन्थस्य रचनाकारः –

(a) नागेशभट्टः
(b) भट्टोजिदीक्षितः
(c) वरदराजः
(d) वामनः

3. 'अथ शब्दानुशासनम्' इत्यत्र 'अथ' शब्दस्य तात्पर्यः –

(a) मङ्गलार्थकः
(b) अनन्तरार्थकः
(c) अधिकारार्थकः
(d) प्रश्नार्थकः

4. महाभाष्ये आह्निकानां संख्या अस्ति –

(a) 09
(b) 85
(c) 50
(d) 90

5. 'हरी एतौ' इत्यत्र 'हरी' इत्यस्य का संज्ञा ?

(a) सवर्ण संज्ञा
(b) घि संज्ञा
(c) गति संज्ञा
(d) प्रगृह्य संज्ञा

6. कैय्यटेन टीका लिखिता –

(a) श्लोकवार्तिकोपरि
(b) ब्रह्मसूत्रोपरि
(c) मीमांसा–सूत्रोपरि
(d) महाभाष्योपरि

7. ग्रिमनियमः केन संशोधितः ?

(a) वर्नरमहोदयेन
(b) याकोबीमहोदयेन
(c) फोर्तनातोवमहोदयेन
(d) ग्रेसमैन महोदयेन

8. व्याकरणशास्त्रस्य अपरा संज्ञा वर्तते –

(a) पाणिनिशास्त्रम्
(b) वचनशास्त्रम्
(c) शब्दशास्त्रम्
(d) भाषाशास्त्रम्

9. चान्द्रव्याकरणस्य प्रवर्तकः आचार्यः –

(a) चन्द्रमस्
(b) चन्द्रगोमी
(c) चन्द्रगामी
(d) चान्द्रायणः

10. 'शताब्दी' इत्यस्य विग्रहोऽस्ति –

(a) शतानामब्दानां समाहारः
(b) शतस्य अब्दानां समाहारः
(c) शतानि अब्दाः यस्याम्
(d) शतम् अब्दाः यस्याम्

11. मेघदूतानुसारं यक्षस्य शापान्तकालोऽस्ति –

(a) मकरसंक्रान्तिः
(b) शरत्पूर्णिमा
(c) देवप्रबोधिनी – एकादशी
(d) देवशायिनी – एकादशी

12. 'गङ्गायां घोषः' इत्यस्मिन् वाक्ये प्रयोजनं प्रत्याय्यते –

(a) लक्षणया
(b) व्यञ्जनया
(c) तात्पर्यवृत्त्या
(d) उपर्युक्ताभिः सर्वाभिदपि

13. 'गौरवाहिकः' इत्यत्र मम्मटदृष्ट्या कीदृशी लक्षणा अस्ति –

(a) शुद्धा सारोपा
(b) शुद्धा साध्यवसाना
(c) गौणी सारोपा
(d) गौणी साध्यवसाना

14. कूटनीतिप्रधानं नाटकमस्ति –

(a) अभिज्ञानशाकुन्तलम्
(b) उत्तररामचरितम्
(c) मुद्राराक्षसम्
(d) वेणीसंहारम्

15. 'पीड्यन्ते गृहिणः कथं न तनयाविश्लेषदुःखैर्नवैः' इति कस्य वचनम् –

(a) उत्तररामचरिते ऋषिकुमारस्य
(b) कादम्बर्यां चन्द्रापीडस्य
(c) अभिज्ञानशाकुन्तले कण्वस्य
(d) मेघदूते मेघस्य

16. नाटकस्य मुख्यवृत्तं भवति –

(a) प्रख्यातम्
(b) कल्पनाप्रसूतम्
(c) आधुनिकम्
(d) दार्शनिकम्

17. 'बृहत्त्रयी' इति संज्ञया कानि महाकाव्यानि गृह्यन्ते ?

(a) रामायणम्, महाभारतम्, गीता च ।

(b) किरातार्जुनीयम्, शिशुपालवधम्, नैषधम् च ।

(c) रघुवंशम्, मेघदूतम्, कुमारसंभवम् च ।

(d) नैषधम्, रघुवंशम्, जाम्बवतीजयम् च ।

18. 'अपक्लेशं मरणं दारिद्र्यमनन्तकं दुःखम्' इति वाक्यं कः कं प्रति कथयति –

(a) विदूषकः चारुदत्तं प्रति
(b) चारुदत्तः विदूषकं प्रति
(c) विटः विदूषकं प्रति
(d) शकारः विटं प्रति

19. 'नहि प्राणिमन्तो देशा इति वक्तव्ये शौर्यादिमन्तो देशा इति केनाप्युच्यते' इति युक्तिः विश्वनाथेन मम्मटकृत काव्यस्वरूपस्य अधोलिखितं घटकपदं निरसितुमुपस्थापिता –

(a) शब्दार्थौ
(b) अदोषौ
(c) सगुणौ
(d) अनलङ्कृती

20. उत्तररामचरितस्य कस्मिन् अंके भरताश्रमस्य उल्लेखः –

(a) प्रथमे
(b) द्वितीये
(c) चतुर्थे
(d) तृतीये

21. दशकुमारचरितस्य कथानकस्य मूलस्रोतः वर्तते –

(a) स्कन्दपुराणम्
(b) बृहत्कथामञ्जरी
(c) महाभारतम्
(d) रामायणम्

22. उत्तररामचरितस्य तृतीयाङ्कस्य का संज्ञा ?

(a) सत्याङ्कः
(b) सीताङ्कः
(c) रामाङ्कः
(d) छायाङ्कः

23. "न हि सर्वः सर्वं जानाति" इति कस्य कथनम् ?

(a) बाणस्य
(b) माघस्य
(c) चाणक्यस्य
(d) विशाखदत्तस्य

24. काव्यस्य व्यवहारवेदनरूपं प्रयोजनमस्ति –

(a) कवेरेव (b) काव्य–नायकस्यैव

(c) सहृदस्य (d) कवि–सहृदययोरुभयोरेव

25. दृश्यकाव्यं रूपकमिति कथ्यते, यतस्तत्र –

(a) अवस्थानुकृतिर्भवति (b) रूपकालङ्कारस्य प्रचुरप्रयोगो भवति

(c) उक्तं सर्वमेव (d) रामादिस्वरूपस्य आरोपो भवति

26. विश्वनाथानुसारं 'कर्मणि कुशलः' इत्यस्मिन् वाक्ये 'कुशल' इत्यत्र शब्दशक्तिः स्यात् –

(a) लक्षणा (b) व्यञ्जना

(c) अभिधा (d) उक्ताः तिसु एव

27. 'तात्पर्यार्थोऽपि केषुचित्' इति वचनं कस्य आचार्यस्य ?

(a) विश्वनाथस्य (b) पण्डितराजजगन्नाथस्य

(c) मम्मटस्य (d) वामनस्य

28. रघुवंशे 'दीपशिखया' सह कस्याः तुलना कृता कालिदासेन ?

(a) सुदक्षिणायाः (b) इन्दुमत्याः

(c) कौशल्यायाः (d) सीतायाः

29. 'मृच्छकटिकम्' इति पदे सन्धिविच्छेदः –

(a) मृच्छ + कटिकम् (b) मृच् + छकटिकम्

(c) मृच्छक + टिकम् (d) मृत् + शकटिकम्

30. विश्वनाथेन कस्य काव्यलक्षणस्य खण्डनं कृतम् –

(a) राजशेखरस्य (b) दण्डिनः

(c) मम्मटस्य (d) भामहस्य

31. 'अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमा' इत्यत्र 'अविरुद्धाः', 'विरुद्धा' चेत्येतयोः विशेषणपदयोः विशेष्यपदमस्ति –

(a) विभावाः (b) भावाः

(c) अनुभावाः (d) रसदोषाः

32. चतुर्विंशतिसाहस्री संहिता इति कस्य ग्रन्थस्य अपरं नाम विद्यते –

(a) भागवतपुराणस्य (b) गीतायाः

(c) रामायणस्य (d) महाभारतस्य

33. रामायणस्य विभाजनमस्ति –

(a) सर्गेषु (b) अध्यायेषु

(c) अङ्केषु (d) काण्डेषु

34. शकुन्तलोपाख्यानं प्राप्यते –

(a) रामायणे (b) महाभारते

(c) देवीभागवते (d) अग्निपुराणे

35. मनुस्मृतेः प्राचीनतमः टीकाकारोऽस्ति –

(a) कुल्लूकभट्टः (b) व्यासः

(c) भृगुः (d) मेघातिथिः

36. मनुस्मृतौ विवाहस्य भेदाः सन्ति –

(a) सप्त (b) पञ्च

(c) अष्टौ (d) चत्वारः

37. मनुना दशकं धर्मलक्षणं प्रोक्तं, तेषु न गण्यते अधोलिखितम् एकम् –

(a) अहिंसा (b) धृतिः

(c) क्षमा (d) सत्यम्

38. अतीतोपनयनसंस्कारकालस्य का संज्ञा भवति ?

(a) ब्रह्मचारी संज्ञा (b) वेदविद् संज्ञा

(c) परिव्राट् संज्ञा (d) व्रात्य–संज्ञा

39. याज्ञवल्क्यस्मृतौ न्यायालयाः कतिविधाः निर्दिष्टाः –

(a) त्रिविधाः (b) चतुर्विधाः

(c) पंचविधाः (d) षड्विधाः

**40.** कौटिल्येन प्रमुखरूपेण कतिविधाः गुप्तचराः वर्णिताः –

(a) द्विविधः (b) चतुर्विधाः

(c) पञ्चविधाः (d) दशविधाः

**41.** 'सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । वंशानुचरितञ्चेति' कस्य लक्षणमुक्तम् ?

(a) महाकाव्यस्य (b) महाभारतस्य

(c) श्रीमद्भगवद्गीतायाः (d) पुराणस्य

**42.** विद्वद्भिः कौटिल्यार्थशास्त्रस्य रचनाकालः स्वीकृतः –

(a) प्रथमशताब्दी ई.पू. (b) पंचमशताब्दी ई.पू.

(c) तृतीयशताब्दी ई.पू. (d) प्रथमशताब्दी विक्रमसंवत्सरस्य

**43.** महाभारते कति पर्वाणि सन्ति ?

(a) षोडश (b) अष्टादश

(c) नवदश (d) एकविंशति

**44.** विष्णुसहस्रनामस्तोत्रं कस्मिन् ग्रन्थे वर्तते ?

(a) श्रीमद्भागवते (b) विष्णुपुराणे

(c) महाभारते (d) पद्मपुराणे

**45.** अधोलिखितेषु कः ग्रन्थः शतसाहस्रीसंहिता इत्यनेनापि नाम्ना प्रसिद्धः –

(a) रामायणम् (b) महाभारतम्

(c) श्रीमद्भागवतम् (d) शिशुपालवधम्

**46.** 'श्रीमद्भगवद्गीता' महाभारतस्य कस्य पर्वणः भागमस्ति ?

(a) भीष्मपर्वणः (b) कर्णपर्वणः

(c) द्रोणपर्वणः (d) अनुशासनपर्वणः

47. ऋग्वेदस्य प्रथमसूक्तस्य ऋषिः अस्ति –

(a) आङ्गिरसः (b) गौतमः

(c) दीर्घतमः (d) विश्वामित्रः

48. कृष्णयजुर्वेदस्य उपनिषद् अस्ति –

(a) कठोपनिषद् (b) ईशावास्योपनिषद्

(c) केनोपनिषद् (d) कौषीतकि – उपनिषद्

49. मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव इति कथनं वर्तते –

(a) माण्डूक्योपनिषदि (b) केनोपनिषदि

(c) कठोपनिषदि (d) तैत्तिरीयोपनिषदि

50. वेदाङ्गज्योतिषः प्रणेता –

(a) यास्कः (b) महर्षिः लगधः

(c) पिङ्गलः (d) कात्यायनः

51. व्याकरणस्य कात्स्न्र्यमस्ति –

(a) निरुक्तम् (b) कल्पसूत्रम्

(c) शिक्षा (d) छन्दस्

52. ज्यौतिषशास्त्रमाधारीकृत्य वेदानां कालं निर्धारयति –

(a) मैक्समूलरमहोदयः (b) ए. वेबरमहोदयः

(c) बालगंगाधरतिलकमहोदयः (d) विंटरनिट्जमहोदयः

53. 'तन्मे मनः शिवसंकल्पमस्तु' मन्त्रभागोऽयं यजुर्वेदस्य कस्मिन् अध्याये विद्यते ?

(a) प्रथमे अध्याये (b) द्वात्रिंशत्तमे अध्याये

(c) चतुस्त्रिंशत्तमे अध्याये (d) चत्वारिंशत्तमे अध्याये

54. ब्राह्मणग्रन्थेषु प्रमुखतया वर्णितमस्ति –

(a) यज्ञविधानम् (b) साहित्यम्

(c) व्याकरणम् (d) दर्शनम्

55. वेदभाष्यकारेषु कः सर्वाधिक वैदिक ग्रन्थानां भाष्यमकरोत् ?

(a) सायणः (b) महीधरः

(c) दयानन्दः (d) वेंकटमाधवः

56. महाभाष्ये ऋग्वेदस्य कियत्यः शाखाः सूचिताः ?

(a) विंशतिः (b) अष्टादश

(c) एकविंशतिः (d) एकादश

57. याज्ञवल्क्य – मैत्रेयी – संवादः अस्ति –

(a) ईशावास्योपनिषदिं (b) बृहदारण्यकोपनिषदि

(c) कठोपनिषदि (d) केनोपनिषदि

58. 'तिसुः एव देवता' इति नैरुला' इति प्रसंगे 'अग्निः' ________ ।

(a) घुस्थानः (b) अन्तरिक्षस्थानः

(c) पृथिवीस्थानः (d) उपर्युक्तं सर्वम्

59. ऋग्वेदीय – प्रथममण्डले (ऋ.1.32) इन्द्रसूक्ते मन्त्रसंख्या वर्तते –

(a) 12 (b) 10

(c) 15 (d) 13

60. आचार्यशब्दस्य यास्कोक्तं निर्वचनं नास्ति –

(a) आचारं ग्राह्यति (b) आचरणं शोधयति

(c) आचिनोत्यर्थान् (d) आचिनोति बुद्धिम् इति

61. निरुक्तेऽस्ति –

(a) वैदिकशब्दानां संग्रहः (b) वैदिकशब्दानां निर्वचनम्

(c) वेदमन्त्राणां स्वरविवेचनम् (d) वैदिकयज्ञानां प्रक्रिया

62. निरुक्ते "अनर्थका हि मन्त्राः" इति कस्य आचार्यस्य उक्तिः ?

(a) यास्कस्य (b) गार्ग्यस्य

(c) कौत्सस्य (d) औदुम्बरायणस्य

63. नाचिकेतस् उपाख्यानम् कस्मिन् उपनिषदि विद्यते ?

(a) छान्दोग्योपनिषदि (b) ईशोपनिषदि

(c) केनोपनिषदि (d) कठोपनिषदि

64. निरुक्त – दैवतकाण्डानुसारं कतिविधाः ऋचः ?

(a) षड्विधाः (b) पञ्चविधाः

(c) चतुर्विधाः (d) त्रिविधाः

65. नासदीयसूक्तस्य ऋषिः अस्ति –

(a) वशिष्ठः (b) बृहस्पतिः

(c) परमेष्ठी प्रजापतिः (d) विश्वामित्रः

66. वेदाङ्गेषु शिक्षाग्रन्थानां मुख्यं प्रयोजनमस्ति –

(a) व्याकरणशिक्षणम् (b) वैदिक–ऋषिस्तवनम्

(c) नैतिकशिक्षाप्रदानम् (d) शुद्धमन्त्रोच्चारणस्य शिक्षणम्

67. 'न प्रकृतिर्न विकृतिः' अयं कारिकांशः कस्मै प्रयुक्तः अस्ति ?

(a) अहंकाराय (b) ज्ञानेन्द्रियाय

(c) कर्मेन्द्रियाय (d) पुरुषाय

68. 'उपादानग्रहणम्' इति साधकः हेतुः अस्ति –

(a) सृष्टिक्रमस्य (b) प्रत्ययसर्गस्य

(c) सत्कार्यवादस्य (d) कैवल्यस्य

69. "आवरणविक्षेपनामकमस्ति शक्तिद्वयम्" अस्ति –

(a) ज्ञानस्य (b) अज्ञानस्य

(c) ईश्वरस्य (d) मोक्षस्य

70. सांख्योक्तकैवल्यमस्ति –

(a) स्थूलशरीरसूक्ष्मशरीरयोः पार्थक्यम् (b) मरणानन्तरं जन्माभावः

(c) लिङ्गशरीरस्य स्वकारणे विलयः (d) प्रकृतिपुरुषयोः विवेकः

71. कारणताविषये सांख्याभिमतः सिद्धान्तः अस्ति –

(a) कार्यं स्वकारणेषु पूर्वमेव विद्यते ।
(b) कार्यं विवर्तमात्रम् ।
(c) कार्यं स्वकारणैः नवीनमारभ्यते ।
(d) उक्तेषु न कतमोऽपि ।

72. 'प्रतिविषयाध्यवसायो दृष्टम्' इत्यत्र अध्यवसायशब्दस्य अभिप्रेतोऽर्थः अस्ति –

(a) बुद्धिः
(b) अहंकारः
(c) मनः
(d) ज्ञानेन्द्रियाणि

73. योगदर्शनानुसारेण चित्तवृत्तमः सन्ति –

(a) क्षिप्तमूढविक्षिप्तैकाग्रनिरुद्धाः ।
(b) शौच–सन्तोष–तपः स्वाध्यायेश्वरप्रणिधानानि ।
(c) प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ।
(d) अविद्याऽस्मिता – रागद्वेषाभिनिवेशाः ।

74. अद्वैतवेदान्तानुसरं सूक्ष्मशरीरस्य अवयवाः सन्ति –

(a) विंशतिः
(b) पञ्चविंशति
(c) चतुर्विंशतिः
(d) सप्तदश

75. कस्मात् कारणात् प्रकृतेरनुपलब्धिः –

(a) सौक्ष्म्यात्
(b) अतिदूरात्
(c) अतिसामीप्यात्
(d) मनोऽनवस्थानात्

76. 'गोसदृशः गवयः' इदं वाक्यं कस्य प्रमाणस्य उदाहरणमस्ति ?

(a) अनुमानस्य
(b) उपमानस्य
(c) अर्थापत्तेः
(d) शब्दप्रमाणस्य

77. अद्वैतवेदान्तमते कार्यकारणसिद्धान्तः अस्ति –

(a) परिणामवादः
(b) विवर्तवादः
(c) आरम्भवादः
(d) सत्कार्यवादः

78. योगशास्त्रे 'तामिस्रः' कस्य भेदोऽस्ति ?

(a) विपर्ययस्य
(b) प्रत्ययस्य
(c) प्रकृतेः
(d) उपर्युक्तेषु न कस्यापि

79. 'गगनारविन्दं सुरभिः अरविन्दत्वात्' इत्यत्र कः हेत्वाभासः ?

(a) आश्रयासिद्धः
(b) स्वरूपासिद्धः
(c) असिद्धः
(d) विरुद्धहेत्वाभासः

80. अध्यारोपो भवति –

(a) वस्तुनि वस्त्वारोपः
(b) वस्तुन्यवस्त्वारोपः
(c) अवस्तुनि वस्त्वारोपः
(d) अवस्तुन्यवस्त्वारोपः

81. बौद्धदर्शनानुसारेण रत्नत्रयमस्ति –

(a) सम्यग्दर्शनं सम्यग्ज्ञानं सम्यक्चारित्र्यम् च
(b) शीलं समाधिः प्रज्ञा च
(c) सम्यक् दृष्टिः, सम्यक् संकल्पः, सम्यग् वचनञ्च
(d) सुत्तपिटकं, विनयपिटकमभिधम्मपिटकश्चेति

82. पुद्गलपरमाणुसिद्धान्तः कस्मिन् दर्शने स्वीकृतः ?

(a) बौद्धदर्शने
(b) न्यायदर्शने
(c) वैशेषिकदर्शने
(d) जैनदर्शने

83. प्रतीत्यसमुत्पादसिद्धान्तः स्वीक्रियते –

(a) चार्वाकदर्शने
(b) जैनदर्शने
(c) बौद्धदर्शने
(d) न्यायदर्शने

84. जैनदर्शने पदार्थाः मन्यन्ते –

(a) नव
(b) सप्त
(c) द्वादश
(d) षट्

85. सांख्यमते "न बध्यते न मुच्यते न संसरति" एतानि विशेषणानि सन्ति –

(a) पुरुषस्य
(b) प्रकृतेः
(c) बुद्धेः
(d) मनसः

86. शून्यवादस्य प्रवर्तकः –

(a) नागार्जुनः (b) अश्वघोषः

(c) रत्नकीर्तिः (d) महावीरः

87. भाषाणां वर्गीकरणस्य प्रमुखः आधारः स्वीकृतः –

(a) कालः (b) धर्मः

(c) प्रकृतिः (d) आकृतिः

88. अधोलिखितेषु अर्थविस्तारस्य उदाहरणं नास्ति ?

(a) कुशलः (b) मृगः

(c) तैलम् (d) प्रवीणः

89. 'स्वनिमः' इत्यस्य विषये सत्यं कथनं नास्ति –

(a) अयं समान – ध्वनीनां प्रतिनिधित्वं करोति ।

(b) अयं जातेः सदृशः एकः अदृष्यः एककः वर्तते ।

(c) अयं निरन्तरं परिवर्तनशीलं भाषिकं तत्त्वमस्ति ।

(d) अस्मिन् अर्थपरिवर्तनस्य शक्तिः भवति ।

90. जैन–आगमानां मुख्या भाषा अस्ति –

(a) महाराष्ट्री (प्राकृतम्) (b) संस्कृतम्

(c) शौरसेनी–प्राकृतम् (d) (a) तथा (c) उभे

91. वर्णानामतिशयितसन्निधौ का संज्ञा स्यात् ?

(a) संयोगः (b) संहिता

(c) सवर्णः (d) सर्वनामस्थानम्

92. स्वादिपञ्चप्रत्ययानां संज्ञा भवति –

(a) संयोगः (b) संहिता

(c) सवर्णः (d) सर्वनामस्थानम्

93. ‘मनस्’ इत्यत्र ‘टि’ संज्ञकः भवति –

(a) अस्
(b) अनस्
(c) नस्
(d) स्

94. अन्तिमवर्णादव्यवहितस्य पूर्ववर्णस्य संज्ञा का ?

(a) संयोगः
(b) उपधा
(c) टि
(d) भ

95. ‘नमस्ते’ इति पदे ‘ते’ रूपमस्ति –

(a) प्रथमाविभक्तेः बहुवचनस्य
(b) प्रथमाविभक्तेः द्विवचनस्य
(c) द्वितीयाविभक्तेः द्विवचनस्य
(d) चतुर्थीविभक्तेरेकवचनस्य

96. ‘पुण्येन दृष्टोः हरिः’ इत्युदाहरणं कस्य सूत्रस्य वर्तते ?

(a) साधकतमं करणम्
(b) अपवर्गे तृतीया
(c) हेतौ
(d) कर्तृकरणयोस्तृतीया

97. ‘यस्य च भावेन भावलक्षणम्’ इति सूत्रस्य उदाहरणमस्ति –

(a) कर्मणि कुशलः
(b) गोषु दुह्यमानासु गतः
(c) साधुः कृष्णो मातरि
(d) मोक्षे इच्छाऽस्ति

98. अधोलिखितेषु ‘पदम्’ अस्ति –

(a) पठ्
(b) राम
(c) मातृ
(d) गच्छन्ति

99. समासे प्रथमानिर्दिष्टं किं संज्ञकं भवति ?

(a) पदम्
(b) प्रातिपदिकम्
(c) उपसर्जनम्
(d) घु

100. ‘शक्तिमनतिक्रम्य’ इत्यस्य समस्तपदं किम् ?

(a) यथाशक्तिम्
(b) यथाशक्तिः
(c) यथाशक्ति
(d) यथाशक्ती

रफ कार्य के लिए जगह

रफ कार्य के लिए जगह